International Journal of Sanskrit Research 2024; 10(3): 183-188

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 183-188
© 2024 IJSR
www.anantaajournal.com
Received: 13-04-2024
Accepted: 19-05-2024

**केशव नाथ झा**
शोधच्छात्रः व्याकरणाचार्यः (M.A.), शिक्षाचार्यः (M.Ed.), UGC NET Qualified 25&73 Code, At+Post Kalapatti, Phulparas, Madhubani, Bihar, India

**Corresponding Author:**
**केशव नाथ झा**
शोधच्छात्रः व्याकरणाचार्यः (M.A.), शिक्षाचार्यः (M.Ed.), UGC NET Qualified 25&73 Code, At+Post Kalapatti, Phulparas, Madhubani, Bihar, India

# अर्थबोधकसाधनेषु व्याकरणशास्त्रस्य प्राथम्यकथनसमीक्षा

**केशव नाथ झा**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i3c.2388

## प्रस्तावना

प्रयोजनं विना मन्दोऽपि न प्रवर्तते इति सर्वमान्यसिद्धान्तानुसारेण शब्दप्रयोगस्यापि प्रयोजनमस्ति। शब्दप्रयोगं विना जनानां परस्परव्यवहारः न सम्भवति। परस्परव्यवहाराभावेन इदं सम्पूर्णं जगत् अज्ञानरूपिणाऽन्धकारेण व्याप्तं स्यात्। यथा ह्युक्तं काव्यादर्शे दण्डिना-

**इदमन्धंतमं कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।**[1]

एवं हि यथायथं स्वाभिप्रायबोधनं शब्दप्रयोगस्य प्रमुखं प्रयोजनम्। यद्यपि सङ्केतप्रयोगेणापि स्वाभिप्रायस्य बोधनं भवति। सङ्केतप्रयोगकाले जनाः शब्दस्य प्रयोगं न कुर्वन्ति, अपितु हस्ताभ्यां, शिरसा, नेत्राभ्याम्, अङ्गुलिनिर्देशेन च सङ्केतं कृत्वा स्वाभिप्रायं बोधयन्ति। मूकाः जनास्तु स्वाभिप्रायबोधनाय संकेतस्यैव प्रयोगं कुर्वन्ति, तथापि शब्दप्रयोगस्य स्थानं सङ्केतप्रयोगः कदापि न ग्रहीतुं शक्यते। यथायथं स्वाभिप्रायबोधनाय संकेतप्रयोगस्य अपर्याप्तत्वात्, सर्वैर्दुर्बोधत्वाच्च। किञ्च कतिपये सङ्केतप्रयोगाः इच्छानुकूलाः.पारस्परिकाश्च भवन्ति, अतः सन्दर्भेण सह तस्य सम्बन्धः जनसामान्यस्य कृते प्रायः अज्ञेयो जायते। किन्तु शब्दप्रयोगः एकस्य निश्चयार्थस्य बोधं कारयति। अतः स्वाभिप्रायप्रकाशनाय जनसामान्यबोध्यार्थानुकूलानां शब्दानामेव प्रायः प्रयोगो लोकव्यवहारे दृश्यते।

**लौकिकानां हि साधूनामर्थं वागनुवर्तते।**
**ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥**[2]

इति भवभूतिवचनेनापि स्पष्टं भवति लोके शब्दप्रयोगः एकस्य निश्चयार्थस्य बोधनाय क्रियते। श्लोकेऽस्मिन् वाक् इतिशब्दस्य तात्पर्यं शब्दप्रयोगेणैवास्ति।

---

[1] काव्यादर्शः 1.4

[2] उत्तररामचरितम् 1/10

**अर्थस्य लक्षणम्**

शब्दोच्चारणकाले शब्देन योऽर्थः प्रतिभाति सः अर्थः एव तस्य शब्दस्य भवति। तद्यथा अर्थस्य लक्षणं प्रतिपादयति वाक्यपदीयकारः-

**"यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते।**
**तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्॥"**[3]

सर्वे शब्दाः स्वार्थस्य बोधनाय भवन्ति, यस्य अर्थस्य बोधनाय यस्य शब्दस्य प्रयोगः क्रियते, स एव तस्य शब्दस्यार्थो भवति। एतद्विषये पतञ्जलिनाऽपि भणितं यद् - "यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावस्तदभिधाने, किमेभिस्त्रिभिर्भावग्रहणैः क्रियते? एकेन शब्दः प्रतिनिर्दिश्यते द्वाभ्यामर्थः। यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थः" इति।[4]

**शब्देऽर्थस्य सन्निहितत्वम्**

वस्तुतः अर्थः शब्दात् पृथग् न भवति, शब्दे एव अर्थः सन्निहितो भवति। अत एव "पुष्करादिभ्यो देशे" (अष्टाध्यायीसूत्रसंख्या- 5.2.135) इति सूत्रे पठितेन "अर्थाच्चाऽसन्निहिते" इति वार्तिकेन योऽर्थः यत्र सदा सन्निहितो (नित्यं स्थितः) न भवति, तस्माद् अर्थशब्दाद् मत्वर्थे इनिप्रत्ययो भवति, यथा अर्थी इत्यत्र यस्यार्थो भवति याचकः, अर्थकामो वा पुरुषः, योऽर्थः यत्र सदा सन्निहितो (नित्यं स्थितः) भवति तत्र मत्वर्थे इनिप्रत्ययो न भवति, अपि तु मतुप्प्रत्यय एव भवति यथा अर्थवान्। शब्देऽर्थस्य सन्निहितत्वादेव अर्थाद् शब्दार्थयोः सम्बन्धस्य नित्यत्वादेव "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रे शब्दस्य ग्रहणाय अर्थवद् इति शब्दस्यैव प्रयोगः कृतः पाणिनिना, न तु अर्थीति शब्दस्य। शब्दे अर्थः सन्निहित एव भवति इति भाष्यकारेण पतञ्जलिनाऽपि प्रतिपादितम्। तद्यथा-

**शब्दश्च शब्दाद् बहिर्भूतः। अर्थोऽबहिर्भूतः।**[5]

अतः अस्माकं वैयाकरणनये शब्दार्थस्य सम्बन्धो नित्यो भवति। यथा चाह -

**सिद्धे शब्दे अर्थसम्बन्धे च। नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः।**[6]

द्रव्यरूपी अर्थः यदा अनित्यो भवति, तदापि सम्बन्धो नित्यो भवति। यतोहि अर्थावबोधनस्य योग्यता शब्दे भवति, सः शब्दो नित्यो भवति । पतञ्जलिना उक्तम् - अनित्येऽर्थे कथं सम्बन्धस्य नित्यते चेद्योग्यतालक्षणत्वात् सम्बन्धस्य। तस्याश्च शब्दाश्रयत्वात् शब्दस्य च नित्यत्वात्।[7] भर्तृहरिणापि शब्दार्थस्य सम्बन्धस्य नित्यत्वविषये इति स्वकीयकारिकामाध्यमेनोक्तं यत् सूत्राणां, वार्तिकानां, भाष्याणां च प्रणेतृभिः महर्षिभिरपि यथावसरं शब्दार्थसम्बन्धो नित्यः इति प्रतिपादितम्। यथाह-

**नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः।।**[8]

**अर्थबोधनस्य साधनानि, तत्र व्यवहारस्य शिरोमणित्वं च**

शब्दार्थबोधनाय अष्टौ साधनानि संस्कृतवाङ्मये सर्वमान्यानि सन्ति। तानि चेमानि-

1. **व्याकरणम् –** धातुप्रातिपदिकप्रत्यादीनामर्थबोधनानन्तरं शब्दानां वास्तविकार्थज्ञानं व्याकरणेन भवति। अत एव पाचकः इति पदस्यार्थबोधो भवति विक्लित्यनुकूलव्यापारवान् इति।
2. **उपमानम्-** गोसदृशो गवय इति कथनेन सादृश्यकारणात् गवयपदस्याप्यर्थबोधनं जायते।
3. **कोशः-** अमराः निर्जरा देवा इत्यादिकोशवाक्येन देवतावाचकपर्यायशब्दानामर्थबोधो भवति।
4. **आप्तवाक्यम्-** कोकिलः पिकपदवाच्यः इत्याप्तवाक्यात् पिकशब्दस्यार्थबोधः सम्पद्यते।
5. **व्यवहारः-** प्रयोजकवृद्धेन घटमानय इत्युक्तम्, तच्छ्रुत्वा प्रयोज्यवृद्धः घटः आनीतः, तदवलोक्य तत्रत्यस्य बालस्य बोधो भवति यद् घटमानय इत्यस्यार्थो भवति घटानयनरूपकार्यम्, पुनश्च घटं नय, गामानय इत्येवंविधवाक्यप्रयोगे घटस्य नयनरूपकार्यं, गोश्चाऽऽनयनरूपकार्यमवलोक्य घटशब्दस्य, गोशब्दस्य, आनयपदस्य, नयपदस्य चार्थबोधः स्वाभाविकरूपेण बालस्य व्याकरणोपादिसाधनं विनापि जायते।
6. **वाक्यस्य शेषः-** (यवमयश्चरुर्भवति इति वाक्यस्य शेषभागे चरुशब्दस्य दर्शनात् यवशब्दस्यार्थेऽस्मिन् वाक्ये दीर्घशूक एवार्थः, न तु म्लेच्छैर्बोध्यः कङ्गुरित्यर्थः

[3] वाक्यपदीयम् 2.330

[4] महाभाष्यम् 5.1.119

[5] महाभाष्यम् 1/1/65 (तस्मिन्निति निर्दिष्टे पूर्वस्य 1.1.65 इति सूत्रे)

[6] महाभाष्यकारः पस्पशाह्निकम्।

[7] प्रदीपः, महाभाष्यस्य प्रथमाह्निके।

[8] वाक्यपदीयम्, ब्रह्मकाण्डम् / 23

7. **विवृतिः -** तत्समानार्थपदान्तरेण तदर्थकथनं विवृतिः, विवरणं वा कथ्यते। यथा घटोऽस्ति इत्यस्य कलशोऽस्ति इतिविवृत्यात्मकवाक्येन घटशब्दस्यार्थबोधो भवति।
8. **सिद्धपदस्य सान्निध्यम्-** इह सहकारतरौ मधुरं पिको रौति इत्यत्र मधुरं रौति इति सिद्धपदद्वयसान्निध्यात् पिकशब्दः कोकिलस्य वाचकः इति बोधो भवति।

तथा ह्यभियुक्तोक्तिर्विद्यते-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**[9]

यतो हि बालादीनां व्याकरणोपमानकोशादीनां ज्ञानाभावेऽपि तत्तच्छब्दानामर्थबोधः सौकर्येण जायते, अतः शब्दार्थबोधकसाधनेषु व्यवहारो हि शक्तिग्राहकशिरोमणित्वेन स्वीकृतोऽभियुक्तैः।

**अर्थबोधनस्य साधनेषु व्यवहारस्य शिरोमणित्वेऽपि व्याकरणस्य प्राथम्यकथनस्याशयः-**

व्यवहारस्य शक्तिग्राहकशिरोमणित्वेऽपि "शक्तिग्रहं व्याकरणोपमानम्" इत्यभियुक्तौ शक्तिग्रहसाधनेषु प्राथम्येन व्यवहारः कथं न स्थापितः? इति जिज्ञासायाः समाधानाय समीक्षा क्रियते चेत् तदा समाधानं लभ्यते यद् या भाषाः सामान्यजनप्रयोज्याः, यासु भाषासु शब्दानां संख्या अल्पीयसी, यासां भाषाणां प्रयोगक्षेत्रमपि सीमितं भवति, तासां कृते एव व्यवहारः शब्दार्थबोधकसाधनेषु शिरोमणिर्भवितुमर्हति, न तु यस्याः भाषायाः जनसामान्ये सर्वेषां शब्दानां प्रयोगोऽसम्भवो भवति, यस्या भाषायाः शब्दाः संख्यातीताः सन्ति, यस्याः भाषायाः प्रयोगक्षेत्रमपि व्यापकमस्ति, तस्याः भाषायाः संख्यातीतानां शब्दानामर्थबोधनाय कदापि व्यवहारः शिरोमणिर्न भवितुमर्हति। संस्कृतभाषा एतादृशी एव भाषाऽस्ति, अस्यां भाषायां शब्दाः संख्यातीताः सन्ति, प्रयोगक्षेत्रमपि व्यापकमस्ति, अस्याः भाषायाः सर्वे शब्दाः सर्वेषु क्षेत्रेषु कदापि प्रयुक्ता न भवन्ति, अपि तु क्षेत्रविशेषानुसारेण एकस्मिन्नेवार्थे भिन्ना भिन्नाः शब्दाः प्रयुज्यन्ते। एतत्सर्वं महाभाष्यस्य पस्पशाह्निकस्य एभिर्वाक्यैः प्रमाणितं भवति-

1. शब्दानामानन्त्यविषयकं प्रमाणम्- **अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः ॥ एवं हि श्रूयते- 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम'॥ बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम । किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति - वर्षशतं जीवति । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति- आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चास्यागमकालेनैवायुः पर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः॥**[10]
2. एकस्मिन्नेवार्थे प्रयोगान्तरस्य प्रमाणम्- **'प्रयोगान्यत्वात्'। यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा - 'ऊष' इत्यस्य शब्दस्यार्थे- क्व यूयमुषिताः, 'तेर' इत्यस्यार्थे- क्व यूयं तीर्णाः, 'चक्र' इत्यस्यार्थे - क्व यूयं कृतवन्तः। 'पेच' इत्यस्यार्थे- क्व यूयं पक्ववन्त इति ॥**[11]
3. भिन्न-भिन्नक्षेत्रे भिन्न-भिन्नशब्दानां प्रयोग प्रमाणम्- ॥ **सर्वे देशान्तरे ॥ * ॥ सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते ॥**[12]
4. संस्कृतभाषायाः शब्दप्रयोगस्य व्यापकत्वस्य प्रमाणम्- **उपलब्धौ यत्नः क्रियताम् ॥ महान् शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः - एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाऽऽथर्वणो वेदः, वाकोवाक्यम् , इतिहासः, पुराणं, वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य 'सन्त्यप्रयुक्ताः' इति वचनं केवलं साहसमात्रमेव ॥**[13]

संस्कृतभाषाया एवंविधगुणवैशिष्ट्यादेव व्याकरणाध्ययनस्य महाभाष्यकारेण महर्षिपतञ्जलिना रक्षोहागमलघ्वसन्देहाः प्रयोजनम्, इति पञ्च मुख्यप्रयोजनानि,

1. तेऽसुराः।
2. दुष्टः शब्दः।
3. यदधीतम्।

9 परमलघुमञ्जूषा, नामार्थविचारः।

10 महाभाष्यम्, पस्पशाह्निकम्।

11 पूर्वोक्तमेव।

12 पूर्वोक्तमेव।

13 पूर्वोक्तमेव।

4. यस्तु प्रयुङ्क्ते।
5. अविद्वांसः।
6. विभक्तिं कुर्वन्ति।
7. यो वा इमाम्।
8. चत्वारि।
9. उत त्वः।
10. सक्तुमिव।
11. सारस्वतीम्।
12. दशम्यां पुत्रस्य।
13. सुदेवो असि वरुण।

इति त्रयोदशवाक्यांशानां त्रयोदशानुषङ्गिकानि प्रयोजनानि च प्रतिपाद्य अधिकाधिकशब्दानां ज्ञानाय व्याकरणशास्त्रस्य अध्ययनाय लोकोऽयं प्रेरितः।

संस्कृतभाषायाः अधिकाधिकशब्दानां वास्तविकार्थबोधनाय व्याकरणशास्त्रमतिरिच्य किमपि अन्यत्साधनमनवलोक्यैव वाक्यपदीयस्य ब्रह्मकाण्डे मुक्तकण्ठेन प्रोक्तम्-

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वावबोधश्शब्दानान्नास्ति व्याकरणादृते।।**[14]

जातिगुणक्रियासञ्ज्ञानाम् अर्थानाञ्च बोधनाय शब्दा एव सर्वश्रेष्ठं साधनमस्ति। शब्दानां वास्तिकार्थबोधनं कदापि व्याकरणं विना न भवितुमर्हति।

व्याकरणेनैव शब्दस्य वास्तविकार्थबोधः सम्भवोऽस्ति, इति महाभाष्यकारेणापि उपदिष्टम्। तद्यथा-

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्या उशती सुवासाः॥[15]

यः व्याकरणं न जानाति स शब्दं पश्यन्नपि न पश्यति, शृण्वन्नपि न शृणोति। किन्तु यः व्याकरणं जानाति तस्य पुरतः शब्दः स्वरूपं तद्वदेव प्रकटयति यथा सुन्दरवस्त्रादिभिः सुसज्जिताऽपि पत्नी पत्युः सम्मुखं स्वरूपमुद्घाटयति। अर्थात् व्याकरणं यो जानाति सः शब्दस्य प्रकृतिप्रत्ययौ विभज्य सम्यक्तया शब्दस्य ज्ञानं करोति।

अर्थबोधकसाधनेषु व्याकरणशास्त्रस्य प्राथम्यादेव महाभाष्यकारः पतञ्जलिः व्याकरणाध्ययस्य आनुषङ्गिकप्रयोजनप्रतिपादनप्रसङ्गे अर्थज्ञानं विना वैदिकमन्त्राणां पाठोऽपि फलदायको न भवतीति प्रत्यपादयत्। तद्यथा-

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।**[16]

कोऽपि वैदिकः केवलमन्त्रणां शुद्धोच्चारणं करोति। किन्तु मन्त्रार्थं नावगच्छति। स वैदिकः मन्त्रोच्चारणेन न किमपि फलं प्राप्नोति, तथैव यथा अग्नेरभावे शुष्कमिन्धनं न प्रज्वलति। अत एव मन्त्राणामर्थं ज्ञातुं व्याकरणमवश्यमेव पठितव्यम्।

शब्दार्थबोधकसाधनेषु कोशोऽप्येकं महत्त्वपूर्णं साधनं विद्यते, किन्तु कोशेन मूलशब्दस्यैवार्थज्ञानं भवति, व्याकरणेन तु तत्तच्छब्दानां प्रथमादिविभक्तिषु समासे, तद्धिते, स्त्रीप्रत्यये कः कः अर्थः भवति इत्यपि व्याकरणेनैव सम्भवम्।

अत एव अर्थबोधकसाधनेषु व्याकरणोपमानकोशादिषु प्राथम्येन व्याकरणमेव स्थापितं "शक्तिग्रहं व्याकरणोपमान" इत्याद्यभियुक्तोक्तौ।

व्याकरणस्यार्थबोधकसाधनेषु महत्त्वातिशयादेव वेदाङ्गेषु व्याकरणस्य प्रधानत्वं स्वीकृतं भाष्यकारेण। यथा कस्यापि शरीरधारिणः पुरुषस्य विभिन्नान्यङ्गानि भवन्ति तद्वद् वेदपुरुषस्याप्यङ्गानि सन्ति। अङ्गानि संयोज्यैव पुरुषाकृतिनिर्मीयते। तद्वद् वेदानां षडङ्गानि मुख्यानि भवन्ति। तेषु षडङ्गेषु व्याकरणं तृतीयमङ्गमस्ति। तच्च वेदपुरुषस्य प्रधानतममङ्गं मुखमस्ति "मुखं व्याकरणं स्मृतमि" ति निर्देशात्। मुखरूपत्वादस्य व्याकरणस्य मुख्यत्वं स्वयमेव सिद्धं भवति। इत्यस्मिन् विषये महाभाष्ये लिखितमस्ति यद् "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति प्रधानं च षट्स्वङ्गेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवति।" इत्यनेन व्याकरणस्य वेदाङ्गेषु प्रधानत्वं सिद्ध्यति।

अर्थबोधकसाधनेषु व्याकरणस्य महत्त्वातिशयादेव यज्ञेन यज्ञमयजन्त देवाः।[17] ये सहांसि सहसा सहन्ते।[18] 'धान्यमसि धिनुहि देवान्'[19] इत्यादिषु मन्त्रेषु व्याकरणशास्त्रीया व्युत्पत्तिरेव यज्ञादिशब्दानामर्थबोधनाय प्रदर्शिता। निरुक्तकारेणापि पृथिवीत्यादिशब्दानां वास्तविकार्थबोधनाय "प्रथनात् पृथिवी इति आहुः" इत्यादि शब्दैः व्याकरणशास्त्रीया व्युत्पत्तिरेव प्रदर्शिता। सायणादयो वेदभाष्यकाराः, काव्यादीनां मल्लिनाथादिप्रभृतयः टीकाकाराः वेदान्तसूत्राणाम् उपनिषदां विष्णुसहस्रनाम्नो भाष्यकारः शङ्कराचार्योऽपि व्याकरणमाश्रित्यैव अधिकतरशब्दानामर्थानां स्पष्टीकरणं कृतवन्तः।

[14] वाक्यपदीयम् ब्रह्मकाण्डम् / 13

[15] महाभाष्यम् प्रथमाह्निकम्।

[16] महाभाष्यम्, पस्पशाह्निकम्।

[17] ऋग्वेद 1.164.50

[18] ऋग्वेद 6.66.9

[19] यजुर्वेद 1.20

**"प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्"** [20] इति ध्वन्यालोककारः आनन्दवर्धनोऽपि व्याकरणशास्त्रज्ञानां मुक्तकण्ठेन प्रशंसा कृता।
व्याकरणस्य ज्ञानानन्तरमेव मनुष्यः कस्याप्यन्यस्य शास्त्रस्य पठनाधिकारी भवति। यथोक्तं भास्कराचार्येण –

**यो वेद वेदवदनं सदनं हि सम्यग्**
**ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।**
**यस्मादतः प्रथमेतदधीत्य धीमान्**
**शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।** [21]

अतः व्याकरणस्य अध्ययनेन सर्वेषामेव शास्त्राणां पठने सौकर्यं भवति , यतो हि अर्थज्ञानद्वारा सर्वत्र प्रवेशः सुलभो भवति तस्य। महाभाष्ये चोक्तम् - सर्ववेदपरिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः आस्थातुम्। [22] एवञ्च ये व्याकरणस्य अध्ययनेन पवित्रवाचो जनाः ते देवतातुल्या प्रोक्ताः –

**रूपान्तरेण ते देवाः विचरन्ति महीतले।**
**ये व्याकरणसंस्कारपवित्रितमुखाः नराः।।** [23]

व्याकरणाध्यनेन न केवलं साधुशब्दज्ञानमेव भवति अपि तु उच्चारणशुद्धिरपि भवति। तेन प्रमादयुक्तोच्चारणात् जायमान: अनर्थो नश्यति। अत एव पिता पुत्रं वदति-

**यद्यपि बहु नाधीषे तथापि पठ पुत्र! व्याकरणम्।**
**स्वजनो श्वजनो माऽभूत्सकलं शकलं सकृच्छकृत्॥**

एवमेव व्याकरणशास्त्रस्य विषये इयमप्युदारा सूक्तिः प्रचलिता वर्तते-

**शब्दशास्त्रमनधीत्य य: पुमान् वक्तुमिच्छति वच: सभान्तरे।**
**रोद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना॥** [24]

यः पुरुषः शब्दशास्त्रमनधीत्य सभायां किञ्चिद् वक्तुमिच्छति, तस्य चेष्टा तादृशी एव मंस्यते यथा कश्चिद् वने मदोन्मत्तं गजं कमलदण्डतन्तुना बन्धुमिच्छति।

**व्याकरणशास्त्रस्य शास्त्रान्तरतो एवंविधवैशिष्ट्यादेव लघुसिद्धान्तकौमुदीकारेणापि श्रीमता वरदराजेनापि स्वकीयग्रन्थस्योपसंहारः एभिः शब्दैः कृतः**

**शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका।**
**कृता वरदराजेन लघुसिद्धान्तकौमुदी।।** [25]

व्याकरणशास्त्रादितरेषु शास्त्रेषु सुकरः प्रवेशः यथा स्यात्, इत्येतर्थमेव बालबुद्धिजनानाम् उपकाराय लघुसिद्धान्तकौमुद्याः रचना कृता वरदराजेन इति भावः।
व्याकरणस्य सर्वशास्त्रोपकारत्वादेव शास्त्रमिदं महाशास्त्रपदेन वर्णितं विद्यते-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।।** [26]

**निष्कर्षः-**

एवं हि संस्कृतभाषायां शब्दानामानन्त्यात्, अस्याः प्रयोगक्षेत्रस्य बहुदेशव्यापित्वात्, अस्याः भाषायाः सर्वेषां शब्दानां सर्वेषु क्षेत्रेष्वप्रयुक्तत्वात्, क्षेत्रविशेषानुसारेण एकस्मिन्नेवार्थे भिन्न-भिन्नशब्दानां प्रयोगदर्शनाच्च अस्याः भाषायाः अधिकाधिकशब्दानां ज्ञानं व्याकरणमतिरिच्य केनापि साधनेन न सम्भवति। अतः अर्थबोधकसाधनेषु व्याकरणस्य सर्वाधिकमहत्त्वं सिद्ध्यति। अतः शक्तिग्राहकसाधनेषु व्याकरणस्य स्थानं प्राथम्येनोल्लिखितं शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्येत्याद्यभियुक्तिवचने।

**सन्दर्भ**

1. सिंहः अमरः, अमरकोषः, चौखम्बा संस्कृत संस्थान, 2064 वि. सं. वाराणसी।
2. आचार्यः वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा-अमर-भारती 2004, एकोनविंशतिः वाराणसी।
3. भर्तृहरिः, वाक्यपदीयम्, डॉ. हरिशचन्द्र त्रिपाठी, 2006 चतुर्थ वाराणसी।
4. झाः सुरेश्वरः, अष्टाध्यायीसूत्रार्थप्रकाशिका, का. सि. द .वि. दरभंगा, प्रकाशन 2004।
5. चौधरी अर्कनाथः, सिद्धान्तकौमुदी, जगदीश प्रकाशन चौड़ा रास्ता जयपुर 2012।

20 ध्वन्यालोकः 1.13
21 सिद्धान्तशिरोमणि गोलाध्याये गोलप्रशंसा 8
22 महाभाष्यम् (तत्पुरुषे कृति बहुलम् 6.3.113)
23 पदमञ्जरी (अथशब्दानुशासनम्, केषां शब्दानाम् इति वाक्यस्य व्याख्यानक्रमे)
24 संस्कृतसुभाषितम्, अष्टाध्यायीसूत्रार्थप्रकाशिकाया भूमिकायामुद्धृतम्।
25 लघुसिद्धान्तकौमुदी।
26 पराशरोपपुराणम्।

6. त्रिपाठी डॉ. जयशङ्कर लाल, परमलघुमञ्जूषा, चौखम्बा प्रेस, वाराणसी वि. सं. 2041।
7. मिश्रः पण्डित श्रीशोभित, काशिकावृत्तिः, चौखम्बा संस्कृत पुस्तकालय बनारस 1952।
8. मिश्रः श्रीहरदत्तः, पदमञ्जरी, संस्कृतपरिषद् उस्मानिया विश्वविद्यालय 1981।
9. जिनेन्द्रबुद्धिः, न्यासटीका।
10. पतञ्जलि, महाभाष्यम् (प्रदीपोद्योतयुतम्) गुरुप्रसादसम्पादितम्, प्रतिभा प्रकाशन, दिल्ली, 1998